# Chapter 7: Third Stage of Yogic Flying

वसिष्ठ उवाच
अणिमादिगुणैश्वर्ययुक्ता सा नृपभामिनी
एवं बभूव चूडाला घनाभ्यासवती सती १
जगामाकाशमार्गेण विवेशाम्बुधिकोटरम्
चचार वसुधापीठं गङ्गेवामलशीतला २
क्षणमप्यगता भर्तुर्वक्षसश्चेतसस्तथा
सर्वेषूवास राज्येषु लक्ष्मीरिव जगत्सु च ३
आकाशगामिनी श्यामा विद्युत्प्रारम्भभूषणा
बभ्राम मेघमालेव गिरिमाला महीतले ४
काष्ठं तृणोपलं भूतं खं वातमनलं जलम्
निर्विघ्नमविशत्सर्वं तन्तुर्मुक्ताफलं यथा ५
मेरोरुपरि शृङ्गाणि लोकपालपुराणि च
दिग्व्योमोदररन्ध्राणि विजहार यथासुखम् ६
तिर्यग्भूतपिशाचाद्यैः सहनागामरासुरैः
विद्याधराप्सरःसिद्धैर्व्यवहारं चकार सा ७
यत्नेन तं च भर्तारमात्मज्ञानामृतं प्रति
बहुशो बोधयामास चूडाला न विवेद सः ८
कलाविदग्धा मुग्धा च बालेयं गृहिणी मम
इत्येवं केवलं राजा स चूडालां विवेद ताम् ९
एतावतापि कालेन तामेवं गुणशालिनीम्
बालो विद्यामिव नृपश्चूडालां न विवेद सः १०
साप्यलब्धात्मविश्रान्तेस्तां सिद्धिश्रियमात्मनः
दर्शयामास नो राज्ञः शूद्रस्येव मखक्रियाम् ११

श्रीराम उवाच
महत्याः सिद्धयोगिन्यास्तस्या अपि शिखिध्वजः
यत्नेन प्राप नो बोधं बुध्यतेऽन्यः कथं प्रभो १२
वसिष्ठ उवाच
उपदेशक्रमो राम व्यवस्थामात्रपालनम्
ज्ञप्तेस्तु कारणं शुद्धा शिष्यप्रज्ञैव राघव १३
न श्रुतेन न पुण्येन ज्ञायते ज्ञेयमात्मनः
जानात्यात्मानमात्मैव सर्पः सर्पपदानिव १४
श्रीराम उवाच
एवंस्थिते वाथ मुने कथमेतज्जगत्स्थिता
क्रमो गुरूपदेशाख्यः स्वात्मज्ञानस्य कारणम् १५
वसिष्ठ उवाच
अत्यन्तकृपणः कश्चित्किराटो धनधान्यवान्
अस्ति विन्ध्याटवीकक्षे कुटुम्बी ब्राह्मणो यथा
१६
तस्यैकदा निपतिता गच्छतो विन्ध्यजङ्गले
एका वराटिका राम तृणजालकसंवृते १७
कार्पण्यात्स प्रयत्नेन सर्वं तृणतुषादिकम्
कपर्दकार्थमभितो दुधाव दिवसत्रयम् १८
कपर्दकाः स्युर्भवता चत्वारोऽष्टौ च कालतः
ततः शतं सहस्रं च सहस्रे चेति चेतसा १९
कलयञ्जङ्गले दीनो रात्रिंदिवमतन्द्रितः
जनहाससहस्राणि बुबुधे न परं तु सः २०

ततो दिनत्रयस्यान्ते तेन तस्माच्च जङ्गलात्
पूर्णेन्दुबिम्बप्रतिमो लब्धश्चिन्तामणिर्महान् २१
तं प्राप्य तुष्टहृदयः समागम्य गृहं सुखम्
प्राप्ताखिलजगद्भूतिशान्तसर्वतया स्थितः २२
एवं यथा किराटेन कपर्दान्वेषणेन तत्
रत्नं लब्धं जगन्मूल्यमहोरात्रमखेदिना २३
तथा श्रुतोपदेशेन स्वात्मज्ञानमवाप्यते
अन्यदन्विष्यते चान्यल्लभ्यते हि गुरुक्रमात् २४
ब्रह्म सर्वेन्द्रियातीतं श्रुतादीन्द्रियसंविदः
तेनोपदेशादनघ नात्मतत्त्वमवाप्यते २५
गुरूपदेशं च विना नात्मतत्त्वागमो भवेत्
केन चिन्तामणिर्लब्धः कपर्दान्वेषणं विना २६
तत्त्वस्यास्य महार्थस्य गुरूपकथनं गतम्
अकारणं कारणतां मणेरिव कपर्दकः २७
पश्य राघव मायेयं मोहिनी महतामपि
अन्यदन्विष्यते यत्नादन्यदासाद्यते फलम् २८
अन्यत्करोति पुरुषः फलमन्यदेव
प्राप्नोति यन्त्रिषु जगत्स्ववलोक्यते च ।
तस्मादनन्तरभवस्य जगद्भ्रमस्य
श्रेयोतिवाहनमसङ्गमनिच्छयैव २९

इत्यार्षे श्रीवासिष्ठमहारामायणे वल्मीकीये मोक्षोपायेषु निर्वाणप्रकरणे किराटोपाख्यानं नाम त्र्यशीतितमः सर्गः ८३